अधर्म्मे—स्वारसिकप्रवृत्तिमति "अधर्म्माच्चेति वक्तव्यमिति" ठकि तु आधर्म्मिक इत्यप्यत्र त्रि० ।

**अधि** अव्य० न+धा—कि । अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधिकृत्येत्यर्थे, उपरि, आधिक्ये, अतिशये च । अस्य ऐश्वर्य्ये, स्वत्वे च कर्म्मप्रवचनीयत्वेन तद्योगे सप्तमी, अधि रामे भूः, अधि भुवि राम इति । "अधिः अध्ययनैश्वर्य्यवशित्वस्मरणाधिकेषु" इति गणरत्ने उक्तम् तत्रोपाध्यायादधीते इत्यादावध्ययने, इङोऽध्ययनार्थकत्वस्य अधिर्द्योतकः । ऐश्वर्य्ये अधिपतिः, वशित्वे अधीनः, अधिगतमिनम् अत्या०स० । स्मरणे मातुरध्येति इकः स्मरणार्थत्वमधिर्द्योतयति । अधिके, अधिकमिति अधि+कन् । "अधिपरी अनर्थकाविति" पा० उक्तेः आनर्थक्ये गतित्वाभावात् नोपसर्गत्वं तेन अध्यागच्छति इत्यादौ गतिसंज्ञाबाधात् "गतिर्गताविति" पा० निघातो न । अतएव अस्य धात्वर्थत्वमात्रद्योतकत्वेऽपि विशिष्टक्रियाद्योतकत्वाभावात् अनर्थकत्वव्यवहारः विशिष्टक्रियायोगाभावाच्च नोपसर्गत्वम् तेन "तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषीति" रघौ न षत्वम् सति च क्रियाविशेषद्योतकत्वे अधितष्ठावित्यादाविव उपसर्गत्वेन षत्वमिति भेदः । मुग्धबोधे तु "नात्वाच्चायां स्वतो नातिक्रमेऽतिः पर्य्यधी गताविति" गत्यर्थद्योतकत्वे नोपसर्गत्वमित्युक्तम् तेन नाकमधितस्थुषीत्यस्य गतवतीत्यर्थकतयोपसर्गत्वाभावान्न षत्वमिति विवेकः । तथा अधिके, "इतो वा सातिमीमहे दिवो वा पार्थिवादधि" इति ऋ० १,६,१० "अधीमहे आधिक्येन याचामहे" इति भाष्यम् । उपरि "ये नाकस्याधि रोचने दिवीति" ऋ० १,१९,६, "नाकस्य दुःखरहितस्य सूर्य्यस्य उपरीति" भाष्यम्, अधिकारे "यदत्र मामधिकरिष्यतीति" सि० कौ० । विभाषा कृञीति पा० । वा गतित्वमत्र विनियोक्तुरीश्वरत्वं गम्यते अधिकारो विनियोगः । आधिक्ये "अधिगत्य जगत्यधीश्वरादिति" नैष० अधिगत्येत्यादौ गमेर्विशिष्टज्ञानार्थत्वद्योतकत्वात् उपसर्गत्वम् "धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते, तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधे"त्युक्तेः विशिष्टज्ञानार्थता, तेन गतिसमासे ल्यप् । "अधिगतं विधिवद् यदपालयदित्यादौ" दायत्वेन लब्धमित्यर्थः । एवमन्यत्रापि विशेषार्थद्योतकता विज्ञेया । आधीयते दुःखमनेनेति आ+धा—कि वा पृ० ह्रस्वः । मनःपीड़ायाम् पु० ।

**अधिक** त्रि० अध्यारूढ एव स्वार्थे कन् उत्तरपदलोपश्च । प्रधाने अतिरिक्ते, "जनं न सत्वेष्वधिको बबाधे" इति रघुः । आधिक्यं च योग्यपरिमाणातिक्रमः अतिशयवृद्धिश्च । तत्रानुरूपातिक्रमे "अकालप्रसवा नार्य्य इत्युपक्रम्य "हीनाङ्गीमधिकाङ्गीश्च जायन्ते यदि वा त्रय" इत्यरिष्टमुक्तमुदाहार्य्यम् । "हीनाङ्गमधिकाङ्गञ्च श्राद्धभोज्ये विवर्ज्जयेदिति" स्मृतिः । "इयमधिकमनोज्ञा वल्कलेनापि तन्वीति" शकु० । "अधिकं फलमश्नुते" इति पुरा० । असाधारणे च । "ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति" गौतमः "ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम् । क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्त्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम् । "निर्विष्टं वैश्यशूद्रयोरिति" । अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणं, शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम् । एवमनुलोमजानाम्प्रतिलोमजानाञ्च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तं सूतानामश्वसारथ्यमित्यादि तत्तत् सर्वं निर्विष्टशब्देनोच्यते सर्वस्यापि भृतिरूपत्वात् "निर्वेशो भृतिभोगयोरिति" त्रिकाण्डीस्मरणात् । तत्तदसाधारणं वेदितव्यम्" इति मिताक्षरा । दर्पणोक्ते अर्थालङ्कारभेदे यथा दर्पणे "आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते" । "किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र । अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि" इत्यत्राश्रयस्य । "युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः" इति माघे तु आश्रितस्याधिक्यम् । भावार्थे ष्यञ्—आधिक्यम् । उचित प्रमाणातिरेके न० ।

**अधिकतर** त्रि० अधिक+तरप् । द्वयोर्मध्ये उत्कृष्टे एकस्मिन्, [अत्यन्तोत्कृष्टे च ।

**अधिकतम** त्रि० अधिक+तमप् । बहूनां मध्ये एकस्मिन् उत्कृष्टे, अत्यन्तोत्कृष्टे च ।

**अधिकमास** पु० कर्म्म० । मलमासे तद्विवरणमधिमासशब्दे ।

**अधिकरण** न० अधि+कृ—ल्युट् । आधारे, व्याकरणशास्त्रे "कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति" हरिपरिभाषिते अधिकरणसंज्ञके कर्तृकर्म्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गृहस्य कर्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाकक्रियाश्रयत्वात्, गृहादेः । "आधारोऽधिकरणमिति" "सप्तम्यधिकरणे इति" पा० ।